श्चानां श्राद्धादिषु विभवे सत्यनिमन्त्रणे एतदेव दशपणात्मकं दण्डनं वेदितव्यम् ॥ * ॥ देशान्तरमृतवणिग्रिक्थ प्रत्याह ।
"देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ।
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः ॥"
यदा सम्भूयकारिणां मध्ये यः कश्चिद्देशान्तरं गतो मृतस्तदा तदीयमंशं दायादः पुत्राद्यपत्यवर्गः बान्धवाः मातृपक्षीयाः मातुलाद्याः ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा आगताः सम्भूयव्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुस्तैर्विना दायाद्यभावे राजा गृह्णीयात्। वाशब्देन च दायादीनां वैकल्पिकं अधिकारं दर्शयति । पौर्व्वापर्य्यनियमस्तु पत्नी दुहितर इत्यादि प्रतिपादित एवात्रापि विज्ञेयः । शिष्यमन्त्रब्रह्मचारिब्राह्मणनिषेधवणिक्प्राभिश्च वचनप्रयोजनम् । वणिजामपि मध्ये यः पिण्डदानर्णदानादिसमर्थः स गृह्णीयात् । सामर्थ्याविशेषे पुनः सर्व्वे वणिजः संसृष्टिनो विभज्य गृह्णीयुस्तेषामभावे दशवर्षं दायाद्यागमनं प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् तदिदं नारदेन स्पष्टमुक्तम् ।
"एकस्य चेत् स्यात् मरणं दायादोऽस्यतदाप्नुयात्
अन्यो वाऽसति दायादे शक्ताश्चेत् सर्व एव ते ॥
तदभावे तु गुप्तं तत् कारयेद्दशवत्सरात् ।
अस्वामिकमदायादं दशवर्षस्थितं ततः ॥
राजा तदात्मसात् कुर्य्यात् एवं धर्म्मो न हीयते॥"
किञ्च ।
"जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् ।"
जिह्मो वञ्चकः तं निर्लाभं निर्गतलाभं लाभमाच्छिद्य त्यजेयुः बहिष्कुर्य्युः । यस्तु सम्भूयकारिणां मध्ये भाण्डप्रत्यवेक्षणादिकं कर्त्तुमसमर्थोऽसावन्येन स्वं कर्म्म भाण्डभारवाहनं तदायव्ययपरीक्षादिकं कारयेत् । इति मिताक्षरा ॥
सम्भृतः, त्रि, (सं + भृ + क्त ।) सम्यक्पुष्टः । सम्यग्भृतः । सम्यक्प्रकारेण धृतः ।
सम्भृतिः, स्त्री, (सं + भृ + क्तिन् ।) सम्यक्पोषणम् । सम्यग्भरणम् । सम्यग्धारणम् । ( सम्भारः । यथा, कथासरित्सागरे । १०३ । १७१ ।
"अन्येद्युर्गणकैः सूनोर्लग्नाहे निश्चिते नृपः ।
चकारामरदत्तोऽत्र तद्विवाहाय सम्भृतिम् ॥")
सम्भेदः, पुं, (सं + भिद् + घञ् ।) सिन्धुनद्योः सङ्गमः । इत्यमरः । १ । १० । ३५ ॥ (यथा, मनुः । ८ । ३५६ ।
"परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनां वापि सम्भेदे स संग्रहणमाप्नुयात् ॥")
स्फुटनम् । ( यथा, सुश्रुते । २ । ५ ।
"कान्त्यं गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम्॥")
मेलनम् । इति मेदिनी ॥
सम्भोगः, पुं, (सं + भुज् + घञ् ।) भोगः । (यथा, मनुः । ८ । २०० ।
"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः ॥")
सुरतम् । (यथा, महाभारते । ४ । १३ । २८ ।
"रत्युत्सवसमारम्भाः साक्षात्कारकरा मम ।
आत्मप्रदानसम्भोगात् मामुद्धर्त्तुं त्वमर्हसि ॥")
जिनशासनम् । इति मेदिनी ॥ हर्षः । इति शब्दरत्नावली ॥ केलिनागरः । इति जटाधरः ॥ शृङ्गारभेदः । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं सम्भोगः समुदाहृतः ॥"
सम्भोगी, [न्] पुं, (सम्भोगोऽस्यास्तीति । इनिः ।) केलिनागरः । इति भूरिप्रयोगः ॥ सम्भोगविशिष्टे, त्रि ॥
सम्भ्रमः, पुं, (सं + भ्रम + घञ् ।) भयादिजनितत्वरा । (यथा, रघुः । ११ । २५ ।
"वीक्ष्य वेदिमथ रक्तबिन्दुभि-
र्बन्धुजीवपृथुभिः प्रदूषिताम् ।
सम्भ्रमोऽभवदपोढकर्म्मणा-
मृत्विजां च्युतविकङ्कतस्रुचाम् ॥")
तत्पर्य्यायः । संवेगः २ । इत्यमरः । १ ।७।३४ । आवेगः ३ । इति तट्टीका ॥ प्रवेगः ४ त्वरा ५ त्वरिः ६ । इति वाचस्पतिः ॥ भयम् । (यथा, रामायणे । ४ । २ । १४ ।
"सम्भ्रमस्त्यज्यतामेष सर्व्वैर्वालिकृते महान् ॥")
आदरः । इति मेदिनी ॥ महाभ्रमः । स्तवम् । इत्यजयपालः ॥
सम्मतिः, स्त्री, (सं + मन + क्तिन् ।) अभिलाषः । अनुज्ञा । इति मेदिनी ॥ (यथा, किराते । १० । ३६ ।
"कथमिव तव सम्मतिर्भवित्री
सममृतुभिर्मुनिनावधीरितस्य ॥")
आत्मज्ञानम् । इत्यजयपालः ॥
सम्मदः, पुं, (सम् + मद् + "प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति अप् ।) हर्षः । ( यथा, साहित्यदर्पणे । ३ । १६० ।
"मदसम्मदपीड़ाद्यैर्वैस्वर्य्यं गद्गदं विदुः ॥")
मत्स्यविशेषः । यथा, विष्णुपुराणे ।४ । २ । १८ ।
"बह्वृचश्च सौभरिर्नाम महर्षिरन्तर्ज्जले द्वादशाब्दं कालमुवास । तत्र चान्तर्ज्जले मत्स्यः सम्मदो नामातिबहुप्रजोऽतिप्रमाणो मीनाधिपतिरासीत् ॥" तद्वति, त्रि । इत्यमरः ।१।४।२४॥
सम्मर्द्दः, पुं, (संमृद्यतेऽनेति । सं + मृद् + घञ् ।) युद्धम् । इति केचित् ॥ (यथा, महाभारते । ५ । १६८ । १० ।
"जवे प्रहारे संमर्द्दे सर्व्व एवातिमानुषाः ।
सर्व्वैर्ज्जिता महीपाला दिग्जये भरतर्षभ ॥")
परस्परविमर्द्दः । यथा, रघुः । १५ । १०१ ।
"यद्गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम् ।
अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥")
सम्मादः, पुं, (सं + मद् + घञ् ।) सम्यक्प्रकारेण मत्तता ॥
सम्मानः, पुं, (सम् + मन + घञ् ।) समादरः । यथा, तिथ्यादितत्त्वे ।
"जन्मर्क्षयुक्तां यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवन्ति तद्वत्सरमेव याव-
न्नैरुज्यसम्मानसुखानि तस्य ॥"
सम्मानितः, त्रि, (सम्मानोऽस्य जातः । सम्मान + इतच् ।) समादृतः । गौरवितः । यथा, मार्कण्डेयपुराणे । ८२ । ३० ।
"अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ।
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥"
सम्मार्ज्जकः, पुं, (सम्मार्ज्जयतीति । सं + मृज + ण्वुल् । ) सम्मार्जनी । इति शब्दरत्नावली ॥ सम्यङ्मार्जनकर्त्तरि, त्रि ॥
सम्मार्ज्जनं, क्ली, (सं + मृज + ल्युट् ।) संशोधनम् । यथा, रत्नमालायाम् ।
"सम्मार्जनञ्च संशुद्धिः संशोधनविशोधने ॥"
सम्मार्ज्जनी, स्त्री, (संमृज्यतेऽनयेति । सं + मृज + ल्युट् । ङीप् ।) धूल्यादिमार्जनसाधनी । कोंस्ता इति झाँटा इति च भाषा । तत्पर्य्यायः । शोधनी २ । इत्यमरः । २ । २ । १८ । ऊहनी ३ समूहनी ४ । इति शब्दरत्नावली ॥ बहुकरी ५ वर्द्धनी ६ । इति हेमचन्द्रः ॥
सम्मितः, त्रि, (सं + मा + क्तः ।) समानपरिमाणः । सदृशः । इति जटाधरः ॥
सम्मिश्रः, त्रि, (सम्यक् प्रकारेण मिश्रयतीति । मिश्र मिश्रणे + अच् ।) संयुक्तः । मिश्रितः । यथा, तिथ्यादितत्त्वे ।
"सम्मिश्रा या चतुर्द्दश्या अमावस्या भवेत् क्वचित् ।
खर्व्वितां तां विदुः केचिदुपेध्वमिति चापरे ॥"
सम्मुखः, त्रि, (सम्यक् मुखं यस्य ।) अभिमुखागतः । तत्पर्य्यायः । भग्नपृष्ठः २ । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे ।२७। १३८ ।
"तस्यां विक्रमसिंहाख्यो बभूवान्वर्थयाख्यया ।
राजा वैरिमृगा यस्य नैवासन् सम्मुखाः क्वचित् ॥"
अभिमुखे, क्ली । सुमुख इति भाषा ॥ यथा, कथासरित्सागरे । ४ । ७० ।
"नाशकत् सम्मुखे स्थातुं कष्टो ह्यविनयक्रमः ।"
तथा च साहित्यदर्पणे । ३ । १५४ ।
"दृष्टा दर्शयति व्रीड़ां सम्मुखं नैव पश्यति ॥"
सर्व्वं सुखमिति निपातनात् अन्तलोपे सम्मुखमिति सिद्धम् ।" इति शब्दार्थचिन्तामणिः ॥ समस्तमुखे च क्ली । इति काशिका । ५।२।६॥)
सम्मुखी, [न्] पुं, (सम्मुखमस्यास्तीति । इनिः ।) दर्पणम् । इति केचित् ॥
सम्मुखीनः, त्रि (सर्व्वस्य मुखस्य दर्शनः । सम्मुख + "यथामुखसम्मुखस्य दर्शनः खः ।" ५ । २ । ६ । इति खः । ) अभिमुखः । इति हेमचन्द्रः ।३।७३। (यथा, रघुः । १५ । १७ ।
"अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।
रुरोध सम्मुखीनो हि जयो रन्ध्रप्रहारिणाम् ॥")